आकाशवाणी

21/10/2020

<u>मुख्यवार्ताः</u>

- अद्य वर्तते आरक्षि-स्मृति दिवसः । अवसरेऽस्मिन् केन्द्रीयो गृहमन्त्री अवोचत् यत् प्रशासनं आरक्षिबलं आधुनिक-प्रौद्यौगिक्यो-पकरणैः सुसज्जितं विधाय स्वीयसीमाः सुदृढीकरोति ।
- आगामिबिहारविधानसभा निर्वाचनाय निर्वाचनप्रचारो वर्तते चरमावस्थायाम् । तृतीयचरणाय नामाङ्कनपत्राणि निरीक्ष्यन्ते ।
- भारतेन वास्तविक नियन्त्रण सीम्नि भारतीयक्षेत्रं सम्प्राप्तः चीनदेशीयलुप्तः सैनिकः तद्देशाय प्रत्यावर्तितः।
- कोविड नाइन्टीन् इति वैश्विक सङ्क्रमणं विरुध्य सङ्घर्षः प्रवर्ततेतराम् । स्वास्थ्य लाभे प्रतिशतं अष्ट एकम् दशमलवोत्तर अष्टाशीतिमितः परिष्कारः ।
- इण्डियन् प्रीमियर् लीग इत्येतस्यां क्रीकेट् स्पर्धामालायां अद्य कोलकाता नाइट राइडर्स इत्यतत् दलं रॉयल चैलेंजर्स बैङ्गलोर इत्ययेतत् दलं च अन्तरा द्वन्द्वः ।

1) अद्य आरक्षि स्मृति दिवसो वर्तते । आरक्षि-कर्मिणां कर्तव्य-निष्ठां राष्ट्र प्रति बलिदानं सम्मानितुं प्रत्येकस्मिन् वर्षे अद्य अर्थात् अक्टूबर मासस्य एकविंशे दिवसे आरक्षि दिवसो आमान्यते । अवधेयास्पदं तथ्यमिदं यत् केन्द्रीया रक्षितारक्षि बलेन गत शताब्दस्य ऊन षष्ठीतमे वर्षे अस्मिन्नेव दिवसे लद्दाखस्य दुर्गम-पर्वतीय-क्षेत्रेषु स्वीय-पराक्रम-बलिदानपरा गाथा प्रमाणिता आसीत् । तस्मिन् दिने सैन्य कर्मिणाम् एकस्मिन् दलं अन्वीक्षणाभियाने संलग्नम् आसीत् यदा चीनदेशीय सैन्यबलेन पूर्वकृत-योजनानुगुणं गोलिकाः प्रहृताः । प्रतिकूल परिस्थितौ सहसा प्रवर्तितेऽस्मिन् आक्रमणे राष्ट्र-रक्षायै समर्पित-सर्वस्वाः केन्द्रीया-रक्षिता-रक्षिबलेन स्वीयं युद्धकौशलं प्रदर्शितम् । राष्ट्र रक्षायै दश सङ्ख्याकाः वीरसैनिकाश्च वीरगतिं उपगताः आसन् । उपराष्ट्रपतिः वैंकय्या नायडुना आरक्षि दिवसावसरे सर्वेभ्यो वीर-सैनिकेभ्यः श्रद्धाञ्जलिः समर्पितः । तेन ट्वीट माध्यमेन प्रोक्तं यत् कृतज्ञराष्ट्रं वीर-सैनिकान् तद्-बलिदानाय वीरतायै प्रतिबद्धतायै च सर्वदा स्मरिष्यति इति । **प्रधानमन्त्रिणा** नरेन्द्रमोदिना अपि कर्तव्यपथि वीरताङ्गतेभ्यो वीरेभ्यः श्रद्धाञ्जलिः समर्पितः । श्रीमोदिना ट्वीट माध्यमेन प्रोक्तं यत् -आरक्षि-स्मृति-दिवसोऽयम् अखिलेऽपि राष्ट्रे वीरताङ्गतेभ्यः आरक्षिकेभ्यः तत्परिवारेभ्यश्च कार्तज्ञभावं प्रकटयितुं वर्तते । तेन प्रोक्तं तेषां बलिदानं सेवा च सर्वदा स्मृतिपथे भविष्यति इति । प्रधानमन्त्री नरेन्द्र मोदी अवोचत् यत् विधि-व्यवस्था-स्थापनादारभ्य जघन्या-पराधिक- प्रकरणानि

यावत्, आपत् प्रबन्धन कार्यात् कोविड नाइन्टीन् इति वैश्विक महामारीं यावत् - एतद्वीरैः सर्वथा योगदानं प्रदत्तम् अस्ति । तत्कर्तव्यभावम् अवधानता च विषये वयं गर्वम् अनुभवामः इति ।

अवसरेऽस्मिन् केन्द्रीय गृह मन्त्री अमित शाहो अब्रवीत् यत् प्रशासनं सुरक्षाबलानि प्रौद्यौगिक्या सुसज्य स्वीय सीम्निषु अतितरां सुदृढताम् आपादयत् अस्ति । श्रीशाहेन अद्य नवदिल्ल्यां राष्ट्रिया-रक्षि-स्मारके आयोजिते आरक्षि पथ सञ्चलन-कार्यक्रमं सम्बोधयन् इदम् अवादीत् इति । तेन कर्तव्य पथि राष्ट्राय सर्वस्व-समर्पित-वद्भ्योः वीरभ्यः स्वीयः श्रद्धाञ्जलिरपि समर्पितः । केन्द्रीयो गृहमन्त्री स्पष्ट्यकरोत् यत् आरक्षिबलं राष्ट्रस्य आन्तरिक सुरक्षां सुदृढीकुर्वन्तु , मोदी प्रशासनञ्च तत्कुटुम्बं प्रति अवधानतां विनिश्चितीकरोति । तेन प्रोक्तं स्मारक-मिदम् ईष्टिका चूर्ण सम्वलितं स्मारक-मात्रं नास्ति अपितु इदं तेषां बलिदानं स्मारयति यैः राष्ट्र-रक्षायै स्वीयं सर्वस्वं समर्पितम् इति ।

2) बिहार विधान सभा निर्वाचनस्य प्रथम चाक्रिक मतदानाय निर्वाचन-प्रचारो चरमावस्थायां समेधितः । सर्वाणि राजनीतिक दलानि नैर्वाचनिक सभायां मतदातृन् स्वपक्षे कर्तुं पूर्णशक्त्या प्रयासरतानि सन्ति इति । अपरतः बिहार विधान सभा निर्वाचनस्य तृतीय चाक्रिक मतदानाय नामाङ्कन पत्राणां निरीक्षणं विधीयते चरणेऽस्मिन् आगामि नवम्बर मासस्य सप्तमे दिनाङ्के पञ्चदश जनपदानाम् अष्टाशीति आसनेषु मतदानम् अनुष्ठीयते । राज्यस्य वाल्मीकि नगर लोकसभा-सनाय त्रिभिः प्रत्याशिभिः नामाङ्कन-पत्रं प्रपूरितम् अस्ति । अवधेयास्पदं तथ्यमिदं यत् अस्मै लोकसभा-सनाय अपि विधानसभा निर्वाचनस्य अस्मिन् तृतीये चरणे एव मतदानम् अनुष्ठास्यते इति । प्रत्याशिनो अस्य मासस्य त्रयोविंशति दिनाङ्कं यावत् नामाङ्कन-पत्रं प्रति-स्वीकर्तुं शक्नुवन्ति । अस्मिन् क्रमे राज्ये विधान सभा निर्वाचनस्य प्रथमे चरणे निर्वाचना-भियानं जवीया गत्या प्रवर्तते । विधानसभायाः प्रथमे चक्रे षोडश जनपदानाम् एकसप्तति आसनेषु अस्य मासस्य अष्टाविंशति दिवसे मतदानम् अनुष्ठीयते ।

3) भारतीय सैन्यबलेन चीनदेशीयः पथभ्रष्ट-सैनिकः प्रत्यावर्तितो यो हि वास्तविक नियन्त्रण रेखं उल्लघ्य भारतं प्रविष्टः आसीत् । असौ अस्य मासस्य अष्टादशे दिवसे लद्दाखस्य पूर्वीय-दिग्भागस्य डेमचॉक क्षेत्रे प्राप्तः आसीत् । चीन देशीय रक्षा-मन्त्रालयेन स्पष्टीकृतं यत् भारतं चीनं च अन्तरा कृत-सन्ध्य-न्तर्गतं भारतेन तद्देशीय सैनिकः चीनी सैन्यबलीय समर्पितः । पीपुल्स लिब्रेशन आर्मी इति चीनदेशीय सैन्य बलस्य सैनिकोऽयं भारत-चीन सीम्नि स्थानीय चारवाहस्य साहाय्य-समये पथ-भ्रष्टोऽभवत् आसीत् इति । चीनदेशीय सैन्यबलेन तस्य लुप्तविषयकं वृत्तान्तं भारतीय सैन्यबलाय सम्प्रेषितम् आसीत् अनन्तरं भारतीय सैन्यबलेन स्पष्टीकृतम् आसीत् यत् उभयोर्देशयोर्मध्ये सञ्जात-साहमत्यानुगुणम् औपचारिक-कार्यजातम् सम्पाद्य असौ चीनाय समर्पयिष्यते इति ।

4) प्रशासनेन प्रतिपादितमस्ति यत् देशे कोरोना-महामारीत: स्वस्थी-भूतानां प्रतिशतता आहत्य अष्टाशीति-दशमलव-अष्ट-एक-मितास्ति संवृत्ता।विगते अहोरात्रे एक-षष्टितो-प्यधिका: संक्रमणग्रस्ता: चिकित्सावकाशं प्राप्ता:।स्वास्थ्यमंत्रालयेन विज्ञापितं यत् साम्प्रतं यावत् पंच-नवति-सहस्रोत्तर-सप्तषष्टि-लक्षं महामारि-पीडिता: स्वस्था:।स्वस्थता-मितौअनुक्रमंपरिलक्षित-परिष्कार-कारणेन हि संक्रमितानां संख्या अपचीयमानास्ति।इदानीं देशे केवलं नव-दशमलव षट्सप्त-प्रतिशतं जना: एव कोरोना-प्रपीडिता: सन्ति।अधिदेशं अधुना मात्रं चत्वारिंशत्सहस्रोत्तर-सप्त-लक्षं जना: एव सन्ति संक्रमिता:।विगते दिवसे चतु:चत्वारिंशदुत्तर-चतु:पंचाशत्सहस्रं महामार्या: नवानि प्रकरणानि समक्षमायातानि।इत्थंदेशेअद्यावधिआहत्यषट्-सप्ततिलक्षतोप्यधिकानिसंवृत्तानिकोरोनाप्रकरणानि। स्वस्थ्य-मंत्रालयेनोक्तमस्ति यत् केंद्रेण विहितै:प्रभावि-रणनीति-परीक्षणादिकार्यै: स्वस्थीभूतानां संख्या वरीवृद्ध्यते मृत्युमितिश्च अपक्षीयते।साम्प्रतंदेशेएकदशमलवपंचमितास्तिमृत्युमिति:।अद्यावधि संक्रमणेन आहत्यप्राय: भूयोपि नव-शताधिक-पंचदश-सहस्रं पीडिता: प्राणैर्वियुक्ता: जाता:।भारतीय-आयुर्विज्ञान-अनुसंधान-परिषद् ब्रूते यत् गतासु चतुर्विंशति-होरासु त्र्यशीति-सहस्राधिक-दश-लक्ष-जनानां कोरोना-परीक्षणं संजातम्।एवं अधिभारतं अद्यावधि द्विसप्तलक्षोत्तर-नव-कोटि-संख्याकानां कोरोना-प्रतिदर्श-परीक्षण-मस्ति विहितम्।

5) उपराष्ट्रपतिः वेंकैया नायडूः देशवासिनः न्यवेदयत् यत् आगामि-पर्वावधौ जनाः कोरोनातः आत्मानं त्रातुं अतोपि सुरक्षा-सम्बद्धाः सावधानताः सन्धारयन्तु, शैथिल्याचारः दुष्करो भविष्यति।एकस्मिन् ट्वीट्सन्देशे श्रीनायडूः प्रावोचद् यत् गतरात्रौ राष्ट्रं संबोधयता प्रधान-मन्त्रिणा जनाः सुष्ठु परामृष्टाः यत् यावन्नैव औषधं तावन्नैव शैथिल्यम् समाचरणीयम्। सामाजिक-दौर्या-नुपालन-सन्निभानां दि□निर्देशानां अनुपालनमस्ति महदावश्यकम् इति ।

<u>सम्प्रति अन्ताराष्ट्रियं वृत्तम्</u>

6) अमरीकीय राष्ट्रपतिः डॉनल्ड ट्रंप् इत्यसौ गतदिनेपेंन्सिल्वेनियाप्रांते प्रचारं समाचरत्।तेन जनाः प्रोक्ताः यत् कोरोना-संक्रमणेन समुत्पन्नायाः महामार्याः निराकरणाय अथ एतेन समागतां आर्थिक-मंदि-स्थितिं साफल्येन सम्मुखीकर्तुं अहं द्वितीयं कार्यकालं समीहे।ऐरी-स्थलेएयरपोर्ट-जनसभासंबोधयताराष्ट्रपतिनाट्रंपेणसमुदीरितं-विद्यालयोद्घाटनं, अर्थव्यवस्थायाः सामान्यीकरणं, देशस्य सुरक्षा-स्वस्थता-गतिशीलतां च कामयमानाः जनाः तत्समर्थने मतदानं कुर्वन्तु।इतः प्राक् डेमोक्रेटिक-दल-प्रत्याशी श्रीट्रंपस्य प्रतिद्वंद्वी च जो बिडेन समारोपितवान् यत् महामारि-नियमने असफलः संजातः ट्रंप् सम्प्रति अर्थ-व्यवस्थो-द्घाटनायविद्यतेसमुत्सुकः।ध्येयमस्तियत्इदानींअमरीकीय-राष्ट्रपति-निर्वाचनायकेवलंसप्ताह-द्वयमेवावशिष्टमस्ति।

<u>सम्प्रति क्रीडावृत्तम्</u>

7) अबूधाब्यां समायोज्यमाणायां आई.पी.एल. क्रिकेट् प्रतियोगितायां अद्य कोलकाता नाइट राइडर्सदलं रॉयल चेलेंजर्स बैंगलुरुदलेन सार्धं स्पर्धिष्यते।इतः प्राक् गतरात्रौ किंग्स इलेवन पंजाबवृन्देन पंचक्रीडकाणां हानिपुरस्सरं डेल्ही कैपिटल्सवृन्दं परास्तम् आसीत्।तत्रैव समुष्ठितायां स्पर्धायां किंग्स इलेवन पंजाबवृन्देन विजयलक्ष्यम् आसीत् अवाप्तम्।अत्र स्पर्धायां उक्तं दलमिदं पंचमं स्थानभाक्।यद्यपि डेल्ही कैपिटल्सवृन्दं शीर्षस्तरे विराजते।